इति ॥ * ॥ छन्दोगपरिशिष्टं । अथातो रजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजजनने विजातीयजनने वा काककङ्कगृध्रवकश्येनभासचिल्लकपोतानां गृहप्रवेशे मानुषस्योपरि विश्रामणे एषामेव क्रियमाणे गृहद्वारारोहणे वाद्भुतेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्ज्जुहोति अद्भुताय अग्नये स्वाहा सोमाय विष्णवे रुद्राय वायवे सूर्य्याय मृत्यवे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकवृतान्य दिति ॥ * ॥ कपोतं विशेषयति शौनकः ।

"रक्तपादः कपोताख्यः अरण्यौकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ॥
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु" ।

कल्पदृष्टेन विधिना गृह्योक्तेन । प्रायश्चित्ताः ज्याहुतीः अद्भुतदोषप्रशमनार्थाः सप्ताज्याहुतीः । अद्भुताय अग्नये स्वाहा इत्यादिमन्त्रैः । तत्र स्थालीपाकेतिकर्त्तव्यतायां पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टं । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठं दक्षिणां तां गां दत्त्वा दोषशान्तिर्भवतीति । तथाचोक्तं,—

"गौर्व्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते" ॥ * ॥

छन्दोगपरिशिष्टं । यस्त्वेषामन्यतममापन्नः प्रायश्चित्तं न कुर्य्यात् तस्य गृहपतेर्म्मरणं सर्व्वस्वनाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गे समाप्तौ । वामदेव्यगानं शान्तिः कर्त्तव्या आवृत्तिप्रकरणसमाम्नायत्वात् । वार्हस्पत्ये । शमयन्त्यासप्राहात् कम्पादिकृतं निमित्तमाश्वेव । अतिवर्षणोः पवासव्रतदीक्षाजप्यहवनानि ॥ * ॥ वराहः ।
ये च न दोषं जनयन्त्युत्पातांस्तान्टतुस्वभावकृतान् ।
ऋषिपुत्त्रकृतैः श्लोकैर्विद्यादेभिः समासोक्तैः ॥

तथा च मत्स्यपुराणं ।

"वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्वनाः ।
परिवेशरजोधूमरक्तार्कास्तमयोदयाः ॥
द्रुमेभ्योऽथ रसस्नेहमधुपुष्पफलोद्गमाः ।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ * ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलं ।
अनग्निज्वलनं स्फोटं धूमरेणुनिराकुलं ॥
रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमं ।
सरिताञ्चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ * ॥
शक्रायुधपरीवेशौ विद्युच्छुष्कविरोहणं ।
कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥
नद्युदपानसरसां वृद्धयुर्द्ध्वं भवनप्लवाः ।
पतनञ्चाद्रिगेहानां वर्षासु न भयावहं" ॥

हरिवंशे वर्षावर्णनायां,—

"क्वचित् कन्दरहासाढ्यं शिलीन्ध्राभरणं क्वचित्" ।

इति दर्शनात् वर्षासु शिलीन्ध्रोद्गमो न भयावहः ॥ * ॥

"दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनं ।
ग्रहनक्षत्रताराणां दर्शनञ्च दिवाम्बरे ॥
गीतवादित्रनिर्घोषो वनपर्व्वतसानुषु ।
शस्यवृद्धिरसोत्पत्तिरपापाः शरदि स्मृताः ॥*॥
शीतानीलतुषारत्वं नर्द्दनं मृगपक्षिणां ।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ॥
दिशो धूमान्धकाराश्च शलभा वनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तत्वं हेमन्ते शोभना मताः ॥ * ॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनं ।
दृष्टाञ्जनाभमाकाशं तारोल्कापातपिञ्जरं ॥
चित्रा गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिणां ।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभावहाः ।
ऋतावन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः" ॥*॥
उन्मत्तानाञ्च या गाथाः शिशूनाञ्चेष्टितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति व्यतिक्रमः ॥
पूर्व्वं चरति देवेषु पश्चाद्गच्छति मानुषान् ।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती ॥*॥

वृहस्पतिः,—

"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणां ।
श्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥

विनेया दण्डनीयाः । इति ज्योतिस्तत्त्वं ॥

अद्भुतः, पुं, शृङ्गारादिनवरसानां मध्ये रसविशेषः । तस्य स्थायिभावो विस्मयः । देवता गन्धर्व्वः । वर्णः पीतः । आलम्बनं लोकातीतवस्तु । उद्दीपनं तद्गुणमहिमा । अनुभावाः स्तम्भस्वेदरोमाञ्चगद्गदस्वरविभ्रमनेत्रविकाशादयः । अस्य व्यभिचारिभावाः वितर्कावेगसम्भ्रान्तिहर्षादयः । इति साहित्यदर्पणं ॥

अद्भुतस्वनः, पुं, (अद्भुतः अतिशयितः स्वनः शब्दो यस्य सः ।) महादेवः । इति त्रिकाण्डशेषः । (अद्भुतः स्वन इति कर्म्मधारये आश्चर्य्यशब्दः) ।

अद्भुतसारः, पुं, (अद्भुतः अतिकठिनः सारः स्थिरांशो यस्य सः ।) खदिरसारः ॥ इति केचित् ॥

अद्मनिः, पुं, (अत्ति भक्षयति सर्व्वान् अदेर्मुट् नेत्यनिः ।) अग्निः । इत्युणादिकोषः ॥

अद्मरः, त्रि, (अद् भक्षणे, सृघस्यदः क्मरच् ।) भक्षकः । भक्षणपरः । इत्यमरः ॥

अद्य व्य, (सद्यपरुत् परार्य्यैषम इति इदमोऽश्भावो द्यश्च निपात्यते ॥) वर्त्तमानदिनं । आजि इति भाषा । इत्यमरः ॥

अद्यतनः, पुं, (सायञ्चिरमित्यादिना ट्युट्युलौ तुट्च ॥) कालविशेषः । स च भाष्यमते दुर्गसिंहमते च पूर्व्वरात्रिशेषदण्डचतुष्टयावधिकपररात्रिसार्द्धयामपर्य्यन्तः । पूर्व्वरात्रिशेषार्द्धावधिपररात्रिप्रथमार्द्धपर्य्यन्तो वा । भट्टहरिक्रमदीश्वरमते पूर्व्वरात्रिशेषप्रहरावधिपररात्रिप्रथमप्रहरपर्य्यन्तः । अद्य जातवस्तुनि त्रि ॥

अद्यश्वीनं, त्रि, (अद्य श्वस् + ख तस्य ईन टिस्वलोप ।) आसन्नमरणादि । अद्य श्वो वा भवति अद्यश्वीनं मरणं । इति संक्षिप्तसारव्याकरणपरिशिष्टं ॥

अद्यश्वीना, स्त्री, (अद्यश्वस् + "अद्यश्वीनावष्टब्धे" इति सूत्रेण ख तस्य ईन टिलोपश्च स्त्रियां टाप् ।) आसन्नप्रसवा अद्य श्वो वा सूते अद्यश्वीना गौः इति संक्षिप्तसारपरिशिष्टं ।

अद्यावधि, स्त्री, (अद्य अवधिः सीमा यस्य तत् ।) अद्यारभ्य । आजि हइतक । इति भाषा । वर्त्तमानदिवसपर्य्यन्तं । आजि नागाइत इति भाषा ॥

अद्रिः, पुं, (अदिशदीति क्रिन् ॥) सूर्य्यः । पर्व्वतः । वृक्षः । इत्यमरः ॥ परिमाणविशेषः । इति शब्दरत्नावली ॥ (शाखी । मानभेदः । सप्ताङ्कः । पर्व्वतमूषिका ॥)

अद्रिकर्णी, स्त्री, (पर्व्वतमूषिकायाः कर्णवत् पुष्पमध्यस्थपत्रं यस्याः सा स्त्रियां ङीप् ।) अपराजिता । इति राजनिर्घण्टः ॥

अद्रिकीला, स्त्री, (अद्रयः कीलाः स्तम्भवत् यस्याः सा पृथिवी ।) भूमिः । इति त्रिकाण्डशेषः ॥

अद्रिजं, क्ली, (अद्रौ जातं इति जनेर्डः ।) शिलाजतु इति रत्नमाला ॥ पर्व्वतजातवस्तुनि त्रि ॥

अद्रिजा, स्त्री, (अद्रेर्जाता इति जनेर्ड ततष्टाप्, पार्व्वती ।) दुर्गा । इति हेमचन्द्रः ॥ सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

अद्रितनया, स्त्री, (अद्रेः तनया ।) पार्व्वती । यथा— एषोऽहमद्रितनयामुखपद्मजन्मेति काव्यप्रकाशः ॥ (अथैनमद्रेस्तनया शुशोच ॥ इति रघुः ॥)

अद्रिनन्दिनी, स्त्री, (अद्रेर्नन्दिनी । पार्व्वती ।) दुर्गा ॥ हिमालयाद्रिजातत्वात् ॥

अद्रिभिद्, पुं, (अद्रीन् पर्व्वतान् भिनत्ति अद्रि + भिद् + क्विप् तुक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

अद्रिभूः, पुं, (त्रि, अद्रौ भवति अद्रि + भू + क्विप् । पर्व्वतजातमात्रे ।) आखुकर्णीलता । इति राजनिर्घण्टः ॥

अद्रिराजः, पुं, (अद्रीनां राजा इति समासे राजाहःसखिभ्यष्टच् ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ।

अद्रिसारः, पुं, (अद्रेः सारः स्थिरांशः ।) लौहः । इति रत्नमाला ॥

अद्रीशः, पुं, (अद्रेः ईशः) शिवः । हिमालयः । इति धरणी ॥

अद्वयः, पुं, (नास्ति द्वयं द्वित्वं यस्य ।) बुद्धः । इति हेमचन्द्रः ॥ (आत्मा । अद्वैतवादी ।)

अद्वयवादी, [न्] पुं, (अद्वयं सर्व्वमेव चित्स्वरूपं नात्मनोऽन्यत् किञ्चनेति वदति अद्वय + वद् + णिनि । वैदान्तिकः ।) बुद्धः । इत्यमरः ॥

अद्वारं, क्ली, (अप्रशस्तं प्रवेशायोग्यं द्वारं ।) द्वारव्यतिरिक्तप्रदेशः । यथा—

"अद्वारेण च नातीयाद् ग्रामं वा वेश्म वावृतं ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्ज्जयेत् ॥"

इति मानवे ४ अध्याये ७३ श्लोकः ॥ प्राचीराद्यावृतं ग्रामं गृहञ्च द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलङ्घनं कृत्वा न विशेत् । रात्रौ च वृक्षमूलावस्थानं दूरतस्त्यजेत् । इति तट्टीकायां कुल्लूकभट्टः ॥ द्वाररहिते त्रि ॥

अद्वितीयः, त्रि, (न विद्यते द्वितीयं यस्य ।) द्वितीयरहितः । (सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं इति श्रुतेः ।) अतुल्यः । यथा,— एकमेवाद्वितीयं ब्रह्म । इति वेदान्तः ॥ नचाग्नि-